कथमविक्रिय आत्मेति द्वितीयो मन्त्रः

न जायते म्रियते वा कदाचि-
न्नायं भूत्वाभविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ २० ॥

न जायते नोत्पद्यते जनिलक्षणा वस्तुविक्रिया नात्मनो विद्यते इत्यर्थः। तथा न म्रियते वा। वाशब्दश्चार्थे। न म्रियते चेत्यन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते। कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः संबध्यते न कदाचिज्जायते न कदाचिन्म्रियते इत्येवम्। यस्मादयमात्मा भूत्वा भवनक्रियामनुभूय पश्चादभविताभावं गन्ता न भूयः पुनः तस्मान्न म्रियते। यो हि भूत्वा न भविता स म्रियते इत्युच्यते लोके। वाशब्दान्नशब्दाच्चायमात्माभूत्वा वा भविता देहवन्न भूयः। तस्मान्न जायते। यो ह्यभूत्वा भविता स जायत इत्युच्यते। नैवमात्मा। अतो न जायते। यस्मादेवं तस्मादजो यस्मान्न म्रियते

BG Ch 2 V 20 continued

तस्मान्नित्यश्च। यद्यपि आद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति तथापि मध्यभाविनीनां विक्रियाणां स्वशब्दैरेव प्रतिषेधः कर्तव्योऽनुक्तानामपि यौवनादिसमस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह शाश्वत इत्यादिना। शाश्वत इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते। शश्वद्भवः शाश्वतः। नापक्षीयते स्वरूपेण निरवयवत्वात्। नापि गुणक्षयेणापक्षयो निर्गुणत्वात्। अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति। यो ह्यवयवागमेनोपचीयते स वर्धते अभिनव इति चोच्यते। अयं त्वात्मा निरवयवत्वात्पुरापि नव एवेति पुराणो न वर्धते इत्यर्थः। तथा न हन्यते। हन्तिरत्र विपरिणामार्थे द्रष्टव्योऽपुनरुक्ततायै। न विपरिणम्यते इत्यर्थः। हन्यमाने विपरिणम्यमानेऽपि शरीरे। अस्मिन्मन्त्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते। सर्वप्रकारक्रियारहित आत्मा इति वाक्यार्थः। यस्मादेवं तस्मादुभौ तौ न विजानितरिति पूर्वेण मन्त्रेणास्य संबन्धः॥ २०॥